International Journal of Sanskrit Research 2018; 4(1): 130-132

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(1): 130-132
© 2018 IJSR
www.anantaajournal.com
Received: 19-11-2017
Accepted: 26-12-2017

**डॉ0 ब्रजेश कुमार मिश्र**
तुमौल, पुतइ, दरभंगा, बिहार, भारत

**Correspondence**
**डॉ0 ब्रजेश कुमार मिश्र**
तुमौल, पुतइए दरभंगाए बिहारए भारत

# ग्रहदृष्टिवषेन शुभाषुभफल–विमर्शः

**डॉ0 ब्रजेश कुमार मिश्र**

**प्रस्तावना**
स्कन्धत्रयात्मकस्य होरास्कन्धस्य जातके ग्रहाणां दृष्टिविचारस्य प्रधानत्वेन विशेषरूपेण विवेचनं विद्यते। ग्रहाणां शक्तिः तेषां रश्मिरेव ययाशक्तया जातकफलं सम्यक्तया विवेचयितुं शक्यते। ग्राहाणां दृष्टिविचारः जातकस्य एकं प्रधानमड्.गं विद्यते यतः ''दृष्टिरस्यान्नवपंचमे प्रत्यक्षतः स्वेह्रदाः'' इत्युक्त्त्वात्। शुभग्रहाणां दृष्टिः शुभकारिका पापग्रहाणां दृष्टिशुभकारिका जातके कथयन्ति जातकज्ञा विद्वांसः। सर्वेग्रहा पूर्णदृष्ट्या सप्तमं पश्यन्ति भार्या स्थानत्वात्। भार्याधर्मसंगिनी धर्मरक्षिणी जन्मजन्मान्तर्गतधर्मसंगिनी रूपत्वात्। भार्याया संरक्षणं सर्वेषां धर्ममूलत्वादिति भावनाया ग्रहाः पश्यन्ति सप्तमंस्थानं पूर्णरूपेण सहधर्मेण। प्रसंगोऽयं स्त्रीजातकस्य यत्र ग्रहदृष्टिवशेनैव शुभाशुभफलं कर्तव्यमिति।
स्थानप्रभाववशादेव दृष्टियुत सफल विज्ञेयमित भावनया सर्वप्रथमं दैवज्ञ जीवनाथमहाभागस्थ्य वचनादरणीयम्। यथा–

प्रसवः पञ्चमे नार्य्याः शरीरं लग्नचन्द्रयोः।
सौभाग्यं सप्तमस्थाने वैधव्यं चाष्टमाल्ये।। [1]

स्त्रियाः पंचमस्थानात् सन्ततेः लग्नचन्द्राभ्यां शरीरस्य सप्तमस्थानात् सौभाग्यस्य अष्टमस्थानाच्च वैधव्यस्य विचारणीयमिति।।

**अपि च–**

भवन्ति मदमन्दिरे सुरगुरुज्ञशुक्रा बलै–
र्युताः सुकुल सुन्दरी संकलसद्गुणैरन्विता।
अनंगरतिवर्द्धिनी सुखतरंगिणी कामिनी
सदा पतिविलासिनी मधुरभाषिणी सा भवेत्।। [2]

यदि स्त्रीजातकस्य सप्तमे भावे बलैर्युताः वृहस्पतिबुधशुक्राः भवन्ति तदा सा कुलीना कुलवर्धमाना सुन्दरी सकलगुणयुक्ता भवति। कामक्रीड़ा बर्धिनी रतोत्संगानुकूला सुखदात्री मधुरभाषिणी च भवति।
एतद्विपरीतं कथयति दैवज्ञजीवनाथः। यथा–

एकेन पापविहगेन मदस्थितेन
प्रायः परेण रमते निभृतं मृगाक्षी।
पापद्वयेन तरसा मदविह्वलांगी
पापत्रयेण कुलटा विपटा प्रमत्ता।। [3]

यदि स्त्रीजातकस्य सप्तम–भावे एकः एव पापग्रहः भवेत् तदा गुप्तरूपेण सप्तमे भावे पापद्वयं यदि भवेत् तदा प्रत्यक्षरूपेण च परपुरूषेण सह रमति। यदि सप्तमस्थं पापत्रयं भवेत् तदा सा कुलटा निर्लज्जाप्रमत्ता च भवति। सप्तमस्थाः पापा अशुभफलं प्रयच्छन्ति।
अपि ग्रहकिरणवशात् फलं निगदति जीवनाथः। यथा–

निजर्क्षे तुंगे वा मदनभवमेशो यदि तनुं
प्रपश्येदंगेशो मदन सदनं पूर्णकिरणः।
तदाबाला हारैरमलमणिमुक्ता विरचितै–
रूपेता नम्रांगी भवति वरसंगीत कुशला।। [4]

यदि सप्तमेश स्वकीय राशौ ऊच्चे वा सन् लग्नं पश्येत् तथा बली लग्नेशोऽपि सप्तमं अवलोकयेत् तदा सा स्त्री मणिमुक्तभिः स्वचितैः हारैः युता नृतांगी संगीतनिपुणा भवति।
यदा शुक्रमंदौ परस्परौ विक्षितौ तदा किं फलमिति विषये कथयति जीवनाथः–

मिथो विक्षितौ शुक्रमंदौ भवेतां
मिथो भागगौ शुक्रभेंगे घटांशे।
स्वकन्दर्पशान्ति करोतीह नारी
नराकारधृक्कामिनीभिः सदैव।। [5]

यदि शुक्रशनिश्च परस्परं विक्षितं, परस्परं एकान्ययोः नवमांशे यदि भवेतां शुक्रराशि वृष–तुला लग्ने कुंभस्य नवमांशे यदि भवेत् तदा निर्मितेन पुरुषाकृतेन स्त्रिभिः स्वकीया कामवासनां संतृप्तयति। तद्यथा–

मन्दभौमभवनेक्षापाकरे लग्नगे भृगुसुतेन संयुते।
वीक्षिते खलखगेन चल्याणामातृभिः संयुते।

शुक्रसहितं चन्द्रः शनिभैमयोः राशि (मकर कुम्भ मेष वृश्चिक) लग्नस्थः यदि भवेत्, पापग्रहेण वीक्षिते तदा सा स्त्री स्वकीयेन मातृभिः सह परपुरुषेण सह रमयति। पुंश्चला नारी लक्षणमत्र प्रतिभाति। यथा–

बलबताऽर्कसुतेन विलोकिते कुजलवे यदिमन्मथमन्दिरे।
शशिमुखी निजयोनिरूदार्त्तिता परकुलं कुलटा व्रजतिक्षणात्।।[7]

सप्तमभावे यदि भौमस्य नवमांशः भवेत् तद बलवान्श ानिः यदि अलोकितः तदा सा स्त्री विजयोनिरूजेन पीड़िता कुलटा सन् शीघ्रमेव परकुले व्रजति। कुत्सित गर्हित कर्मणा रुजेनक्षतयोनिपीड़िता भवति। अपि च–

पाताले लग्ने मदने व्यये निधन मन्दिरे।
मंगल विधवानारी गुरुयोगेक्षणं विना।। [8]

चतुर्थ सप्तमलग्नं द्वादशं अष्टमस्थेषु भावेषु यदि कश्चिदपिभावे भौम, भवेत्, वृहस्पतिनादृष्टयुतं यदि न भवेत् तदा सा स्त्री विधवा भवति। इदमेव कथनस्याभिप्रायः यत् वृहस्पतिना युतेद ृष्टे च सति स्त्री विधवा न भवति।
अत्रैव वराहस्य वचनं, यथा–

अबले सप्तमभवने सौम्येक्षण वर्जिते च का पुरुषः।
भवति पतिश्चरमेऽस्ते प्रवासशीलो भवेद्भ्रान्ती।। [9]

लग्नात्सप्तमगृहे निर्बले शुभदृष्टिरहिते च स्त्री–पति कुत्सितपुरुषः भवति। कुमार्गगामी इत्यर्थः। एवं योगे पतिः गर्हितं मिन्दुतीयं कर्मं करोति। चर राशिः यदि सप्तमगृहे भवेत् गृहात् बहिस्र्थातुं स्वाभावः भ्रमणशीलं च भवति। स्थिरराशौ स्वगृहे द्विस्वभावे च मध्यमसामान्यस्वभावस्य भवति।
अपि च वराहः निगदति। यथा–

वाल्ये विधवाभौमे पति सन्त्यक्ता दिवाकरेऽस्तस्थे।
सौरे पापदृष्टे कन्यैव जारं समुपयाति। [10]

यदि स्त्रीजातकस्य जन्मकुण्डल्यां लग्नात् सप्तमभावे भौमः भवेत् तदा सा बालविधवा भवति। अत्राशुभयुतदृष्टे बली भौमे एव वैधव्य योगं वेदितव्यमिति। शुभयुतदष्टे सति वैधव्ययोगं नास्त्यर्थः। यदि रविः सप्तमभवने भवेत् तदा विवाहा पश्चात् पतिः परित्यजति। बलावल वचारे सति फलादेशं समुचितं विद्यते। पापेन दृष्टे शनौ सप्तमस्थे सति अशुभफलं न भवतीव्यर्थः।

**दृष्टिफलविचारे दैवज्ञजीवनाथस्य विचारः–**

सौम्याभ्यां प्रवराशुभत्रययुतेजाया भवेद्भूपतेः
सौम्येकेन पतिप्रिया मदनगेदृष्टे युते जन्मनि।
पापैकेन पुनर्विलोलनयना पापद्वयेनाधमा
पापानां त्रितयेन सा परकुलं हत्वापतिं गच्छति। [11]

जन्मनि मदनभे सौभ्याभ्यां दृष्टे प्रबरा तथा शुभत्रययुतेदृष्टे भूपतेः जाया भवेत् सौम्ये केन युते दृष्टे पतिप्रिया भवति। पुनः पापैकेन युते दृष्टे विलोयनयना चंचलयुतानयना, पापद्वयेन युते दृष्टे अधमा भवति। त्रितयेन पापानां युते दृष्टे सा पतिं त्यक्त्वा परकुलं गच्छति। स्त्रीजन्मांगे शुभग्रहः सप्तमभावे संयुतः दृष्टे वा भवेत तदा सा शुभगुणैर्युता पतिपरायणा भवति। यदि शुभत्रयं ग्रहसप्तमभावे संयुतः वा भवेत् तदा सा राजमहिषी भवति। सप्तमभावोपरि शुभग्रहस्थैकस्य पतिपरायणा भवति। सप्तमभावोपरि शुभग्रहस्थैकस्य दृष्टिः युतो वा भवेत तदा सा पतिपरायणा भवति।

**ग्रहदृष्टिवषेन वैधव्ययोगं कथं समायाति विषये कथयति भावकुतूहलकारः–**

जनुः काले यस्या मदन भवनेवासरमणौ
पतिं व्यक्त्वा नूनं कुपितहृदया भूमितनये।
अवश्यं वैधव्यं सपदि कमलाक्षी रविसुते
जरां पापैर्दृष्टे निजपति विरोधं व्रजति वा। [12]

स्त्रीजन्मांगे सप्तमभावे यदि सूर्यः स्थितः भवेत् तदा सा उग्रस्वभावयुक्ता पतिमुपेक्ष्य परित्यक्तवती भवति। यदि सप्तमभावः भौमयुक्तः भवेत् तदा वैधव्यकारकः भवति। सप्मस्थे शनौ सति युवत्वे एव बृद्धस्य लक्षणं भवति। सप्तमभावोपरि पापग्रहस्य दृष्टिः यदि भवेत तदा मतैक्यं नास्ति, परस्परं अन्तर्विरोधेन व्रजति।
अपि च –

यस्थाः शशांके जनिलग्नभे वा
समर्क्षगे सा प्रकृतिः स्थिरास्यात्।
शुभेक्षिते रूपवती गुणज्ञा
पतिप्रिया चारूविभूषणाठ्या। [13]

जन्मकाले स्त्रीजन्मांगे चन्द्रः यदि लग्नस्थः तृतीयस्थः वा भवेत् तदा सा स्थिरप्रकृतियुता भवति। स्थिरप्रकृति युता शुभाचरणशीला इत्यर्थः।
यदि चन्द्रः शुभग्रहैर्युतदृष्टं भवेत् तदा स्त्री सुन्दरं गुणवती पतिभक्ता पति अनुरक्ता शुभाभूषणैर्युक्ता च भवति।
लग्नस्थः तृतीयभावस्थः वा चन्द्रः स्थिरप्रकृतिः ददाति। स्त्रीजातकस्य कृते चन्द्रः अपि कारकः विद्यते। चन्द्रः अपि कारकः विद्यते। चन्द्रः शीलस्वभाव ददाति शास्त्रान्तरे कथितम्।
होरास्कन्धस्य जातकः फलादेशस्य कृते ख्याति प्राप्तः। सूक्ष्मनिरीक्षणेन फलं सत्यं घटितमन्यथैव वृषा याति।

**संदर्भाः**

1. भाव प्र0 स्त्री0 जा0 अ0 श्लो0 – 2।
2. भाव प्र0 स्त्री0 जा0 अ0 श्लो0 – 3 ।
3. भाव प्र0 स्त्री0 जा0 अ0 श्लो0 – 4 ।
4. भाव प्र0 स्त्री0 जा0 अ0 श्लो0 –8 ।
5. भा0प्र0स्त्री0जा0अ0श्लो0 – 16 ।
6. भा0प्र0स्त्री0जा0अ0श्लो0 – 19 ।
7. भा0प्र0स्त्री0जा0अ0श्लो0 – 20 ।

8. भा0प्र0स्त्री0जा0अ0श्लो0 – 21 ।
9. लघुजा0 स्त्रीजा0 अ0 14 श्लो0 – 3 ।
10. लघुजा0 स्त्रीजा0 अ0 14 श्लो0 – 4 ।
11. भा0 कुतू0 स्त्री0 जा0 अ0 9 श्लो0– 4 ।
12. भा0 कुतू0 स्त्री0 जा0 अ0 9 श्लो0– 5 ।
13. भा0 कुतू0 स्त्री0 जा0 अ0 9 श्लो0– 6 ।